माषेत्र । त्रयो यवाः कृष्णलम् । माषः पञ्च कृष्णलानि सुवर्णः षोडश माषाः । पलं सुवर्णाश्चत्वारः । धरणन्द्वश पलानि । कृष्णमाषो द्वे कृष्णले । राजतस्य धरणं षोडश कृष्णमाषाः । अस्य च पुराण इति संज्ञान्तरम् । राजतः शतमानः राजतदशधरणानि राजतपलसंज्ञाम्यस्य भवति । "शतमानन्तु दशभिर्धरणैः पलमेव त्विति" याज्ञवल्क्यस्मरणात् । पूर्वोक्तसुवर्णचतुष्टयपरिमित एको राजतनिष्कः । कार्षिकः कर्षसंमितः ताम्रिकस्ताम्रविकारः कार्षापणो विज्ञेयः । पण इति च संज्ञा अस्यैव विज्ञेयेत्यर्थः । चशब्दोऽध्याहार्यः । अतएव बृहस्पतिः "निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" । ताम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पणः । स एव चन्द्रिका प्रोक्ता तासां तास्तु धानकाः । ता द्वादश सुवर्णस्तु दीनाराख्यः स एव तु" । इति कर्षः पलचतुर्थांशः । "ते षोडशाक्षः कर्षोऽस्त्री पलङ्कर्षचतुष्टयम्" इत्यमरसिंहेनाभिधानात् । ते माषाः षोडशाक्षः कर्ष इति च संज्ञेत्यर्थः । तेनाक्षकर्षशब्दयोः सुवर्णपरिमाणवचनत्वमित्यवगम्यते । याज्ञवल्क्यः पले विकल्पमाह "पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम्" । इति तस्य चतुर्थोऽंशो विंशतिमाषा तत्परिमितः कार्षापणः । अतएव कात्यायनः "माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु । काकिणी तु चतुर्भागा माषकस्य पणस्य चेति" । राजतोऽपि कार्षापणोऽस्तीत्याह नारदः "कार्षापणो दक्षिणस्यान्दिशि रौप्यः प्रवर्त्तते" इति । व्यासस्तु निष्कस्य प्रमाणमाह "पलान्यष्टौ सुवर्णस्तु ते सुवर्णाश्चतुर्दश । एतत् निष्कप्रमाणन्तु व्यासेन परिकीर्त्तितम्"

वर्णभेदेन दिव्यव्यवस्थामाह नारदः "ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः । वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु । साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः । विषं विना ब्राह्मणस्य सर्वेषां वा तुला स्मृता" इति । अनित्या चेयं व्यवस्था "राजन्येऽग्निं घटं विप्रे वैश्ये तोयं नियोजयेत् । सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे" इति कात्यायनस्मरणात् । व्यवस्थापक्षे वयोविशेषादिना व्यवस्थापनीयम् तदाह नारदः "क्लीवातुरान् सत्वहीनान् परितप्ताद्गितातुरान् । बालवृद्धातुरांस्त्रीश्च परीक्षेत घटे सदा । स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् । घटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेत् । नास्तिकानाञ्च शुद्धिः स्यात् न विषं पित्तरोगिणाम् । श्वित्रान्धकुनखादीनां नाग्निकर्म विधीयते । न मज्जनीयाः स्त्रीबाला धर्मशास्त्रविचक्षणैः । रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः । निरुत्साहान् व्याधिक्लिष्टानार्त्तांस्तोये निमज्जयेत् । सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते स्मृताः । साहसेऽप्यागतानेतान्नैव तोये निमज्जयेत् । न चापि हारयेदग्निं विषेण विशोधयेत्" याज्ञवल्क्यः "तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् । अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वेति" । स्त्रीत्वात्तज्जातिवयोऽवस्थाविशेषानादरेण । बाल आषोडशाद्वर्षाज्जातिविशेषानादरेण । वृद्धोऽशीतिकावरः । अन्धो नेत्रविकलः । पङ्गुः पादविकृतः । ब्राह्मणोजातिमात्रम् । रोगी व्याधितः ।

एतेषां शोधनार्थं सर्वदिव्यप्राप्तावेषु मार्गशीर्षचैत्रवैशाखेषु स्त्र्यादीनां सर्वदिव्यप्रसक्तौ तुलैवेति नियम्यते न तु सर्वकालं स्त्रीणां तुलानियमः कोषादिविधानात् । अग्निकालस्तत्प्रमाणस्य क्षत्रियस्य । जलमेव वैश्यस्य । यवा यवार्थे शूद्रस्य विषस्य सप्तैव यवा उक्तप्रमाणलक्षणा भवन्तीत्यर्थः । ब्राह्मणस्य तुलाविधानात् अग्निर्जलं वेति क्षत्रियवैश्यविषयमित्यवगम्यते । अतएव पितामहः "ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः । वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्" इति । कात्यायनोऽपि "न लोहशिल्पिनामग्निः सलिलं नाम्बुसेविनाम् । मन्त्रयोगविदाञ्चैव विषं दद्यात्तु न क्वचित् । तण्डुलैर्न नियुञ्जीत व्रतिनं मुखरोगिणाम्" इति । व्रतिनं पयोव्रतादिनियमस्थम् । हारीतोऽपि "कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां नित्यं विषञ्च परिवर्जयेत्" इति ।

विष्णुरपि "न श्लेष्मकारिणां व्याधितानां भीरूणां श्वासकासिकानामम्बुसेविनामुदकं हेमन्तशिशिरयोश्चेति" पितामहोऽपि "कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत् । मद्यपस्त्रीव्यसनिनां कितवानां तथैव च । कोषः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः" इति । यत्तु पितामहेनोक्तम् "व्रतानां भृशार्त्तानां व्याधितानां तपस्विनाम् । स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्मस्त्वपेक्ष्यते" इति तुलेतरविषयं तदिति केचित् तदयुक्तम् । "घटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेदिति पूर्वोदाहृत-